शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

# पौष्पं प्रक्रियाविज्ञानम्

तत्र प्रथमो भागः

## संज्ञापरिभाषम्

प्रणेत्री सम्पादयित्री च

**दीक्षितपुष्पा**

सम्पादनसहायकौ

**विष्णुकान्तपाण्डेयः, ब्रजभूषण ओझाश्च**

**राष्ट्रियसंस्कृतसंस्थानम्**

मानितविश्वविद्यालयः

नवदेहली

शास्त्रीयग्रन्थमाला-८

पाणिनीयाष्टाध्याय्या

# नव्यसिद्धान्तकौमुदी

इत्यपरनामविभूषितं

## पौष्पं प्रक्रियाविज्ञानम्

तत्र प्रथमो भागः

## संज्ञापरिभाषम्

प्रणेत्री सम्पादयित्री च

**दीक्षितपुष्पा**

सम्पादनसहायकौ

विष्णुकान्तपाण्डेयः, ब्रजभूषण ओझाश्च

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# पाणिनीयं महत्सुविहितम्

दीक्षितपुष्पा

बहूनि व्याकरणतन्त्राणि प्रोक्तानि बहुभिर्महर्षिभिर्भगवतः पाणिनेः प्रागपि, किन्तु तत्र न विद्यते साङ्गत्वम्। सूत्रपाठो, धातुपाठो, गणपाठ, उणादिपाठो लिङ्गानुशासनञ्चेति मिलित्वा पञ्चाङ्गं भवति व्याकरणम्। तच्चास्ति पाणिनीये। अथ च वैदिकशब्दानामनुशासनाद् वेदाङ्गत्वमपि। अतश्च प्राचीनेषु सकलेषु व्याकरणशास्त्रेषु पाणिनीयं व्याकरणं प्राधान्यं भजते।

अनन्तो वर्तते शब्दराशिर्लौकिको, वैदिकश्च। तस्य प्रतिपत्तौ प्रतिपदपाठमनभ्युपायं मत्वा भगवता पाणिनिना दुश्चरतपसा निखिललौकिकवैदिकशब्दराशेः प्रत्यक्षमेककालावच्छेदेन कृत्वा प्रकृतिप्रत्ययादिविभागकल्पनापूर्वकमपूर्वमिदं सामान्यविशेषवल्लक्षणमष्टाध्यायीपदव्यपदेश्यं कृतं, येन महतो महतः शब्दौघस्य प्रतिपत्तिरल्पीयसा कालेन जायते।

अत्र सर्वो लौकिको, वैदिकश्च शब्दराशिर्भगवता भागद्वये विभाजितः। अजन्ताः शब्दाः, हलन्ताश्च। अजन्तानां कृतेऽन्त्यमचमाश्रित्य कार्याणि प्रोक्तानि। यथा - अतो गुणे। अतो भिस ऐस्। अतोऽम्। अतो येयः। अतो लोपः। अतो हेः, इत्यादीन्यदन्तानां कृते। आतोऽनुपसर्गे कः। आतश्चोपसर्गे। आतो युच्। आतो मनिन्-क्वनिब्-वनिपश्च। आतो लोप इटि च। आतो युक् चिण्कृतोः, इत्येतानि सूत्राण्याकारान्तानां कृते। एरच्। एरनेकाचोऽसंयोगपूर्वस्य, इतीकारान्तानां कृते। उतश्च प्रत्ययादसंयोगपूर्वात्। उतो वृद्धिर्लुकि हलि। ओर्गुणः। ओः सुपि। इत्यादीन्युकारान्तानां कृते। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ, इतीकारान्तानामुकारान्तानां च कृते। घिसंज्ञामुद्दिश्यापि सर्वं कार्यमिकारान्तामुकारान्तानां च कृते। नदीसंज्ञामुद्दिश्य सर्वमीकारान्तानामूकारान्तानां च कृते। ऋतो ङिसर्वनामस्थानयोः। ऋदृशोऽङि गुणः। ऋतश्छन्दसि। ऋतष्ठञ्। ऋतश्च संयोगादेर्गुणः। ऋद्धनोः स्ये। ऋतश्च। ऋदुशनस्पुरुदंसोऽनेहसां च, इत्यादीनि ऋकारान्तानां कृते। ऋृत इद्धातोः। उदोष्ठ्यपूर्वस्य, इति ॠकारान्तानां कृते। सार्वधातुकार्धधातुकयोः इतीगन्तानां कृते। अचो ञ्णिति। अचो यत् इत्यादीन्यजन्तानां कृते।

किन्तु हलन्तशब्दानां कृते सामान्यं शास्त्रमन्त्यक्रमेण न प्रवर्तते। तच्च हलन्तेषूपधाक्रमेण प्रवर्तते। यथा - पोरदुपधात्। अतो ल्रान्तस्य। अतो हलादेर्लघोः। अत उपधायाः। अत एकहल्मध्येऽनादेशादेर्लिटि, इत्यादीनि सूत्राणि - अदुपधानां कृते सन्ति। रलो व्युपधाद्धलादेः संश्च, इति - इदुपधानाम्, उदुपधानां च कृते। उदुपधाद् भावादिकर्मणोरन्यतरस्याम्, इत्युदुपधानां कृते। ऋदुपधाच्चाक्लृपिचृतेः। रीगृदुपधस्य च। उर्ऋत्। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्, इत्येतानि सूत्राणि - ऋदुपधानां कृते सन्ति। इगुपधज्ञाप्रीकिरः कः। पुगन्तलघूपधस्य च, इत्यादीनि सूत्राणि - इगुपधानां कृते। इदमेव पाणिनीयशास्त्रस्य सामान्यम्। अत्र यदेकस्य भवति तत्सर्वस्य भवत्यपवादान् वर्जयित्वा।

**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्** (वा० १.१.९) -

अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकानुस्वारस्य। इति स्थानानि। कादयो मावसानाः स्पर्शाः। यरलवा अन्तःस्थाः। शषसहा ऊष्माणः। अचः स्वराः। ≍क ≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। अं, अः इत्यचः परावनुस्वारविसर्गौ। यत्नो द्विधा - आभ्यन्तरो बाह्यश्च। आद्यश्चतुर्धा - स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयतनं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणां स्वराणाञ्च। ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। तथा हि सूत्रम् -

**१९. अ अ** (पा० सू० ८.४.६८) -

अ इति लुप्तप्रथमान्तम्। पुनः अ इति लुप्तप्रथमान्तम्। प्रथमोऽकारो विवृतो, द्वितीयश्च संवृतः। धातुप्रातिपदिकप्रत्ययादिषु पठितो यो विवृताकारः स संवृतो भवति। सर्वत्र लोके वेदे ह्रस्वाकारः संवृत एव भवति, न विवृतः। तथा सति 'दण्ड आढकम्' इति दशायाम् अकारः संवृत, आकारश्च विवृतः। उभयोः विवृतसंवृतरूपप्रयत्नभेदेन सवर्णसंज्ञाया अभावात् 'अकः सवर्णे दीर्घः (पा० सू० ६.१.९९)' इत्यनेन दीर्घो न प्राप्नोति। किञ्च वर्णसमाम्नाये 'अइउण्' इत्यत्र यदि अवर्णः संवृतः स्यात् तदा अकारस्य, आकारस्य च प्रयत्नभेदेन सवर्णसंज्ञाया अभावात् ह्रस्वाकारेण दीर्घाकारादीनां ग्रहणं न संभवेत्। अतो धात्वादिषु वर्णसमाम्नाये च ह्रस्वाकारो विवृत एवाङ्गीकृतः। अत एव 'दण्ड आढकम्' इत्यत्र अकारस्य आकारेण साकं सवर्णसंज्ञायां सवर्णेऽचि परतो दीर्घः, अकारेण आकारग्रहणञ्च सिध्यति। वर्णसमाम्नाये समुपदिष्टः अकारो विवृतः, इत्यत्र प्रमाणम् - 'अ अ (पा० सू० ८.४.६८)' इति सूत्रमेव। किन्तु धात्वादिष्वकारस्य विवृतत्वेऽप्यनेन संवृतत्वविधानात् 'दण्ड आढकम्' इति दशायां ह्रस्वाकारस्य संवृतत्वेन पुनरपि सवर्णदीर्घो न स्यात्।

अतोऽत्रोच्यते - सूत्रमिदमष्टाध्याय्या अन्तिमं सूत्रम्। अतः 'पूर्वत्रासिद्धम्' इति सूत्रेण सम्पूर्णामष्टाध्यायीं प्रत्यस्यासिद्धत्वाद् 'अकः सवर्णे दीर्घः (पा० सू० ६.१.९९)' इत्यस्य दृष्टौ 'दण्ड आढकम्' इत्यत्र अकारो विवृतोऽस्ति। अतः 'अकार-आकारयोः' सवर्णसंज्ञायां दीर्घः सिध्यति। एवमेवान्येषां सूत्राणां प्रवृत्तिकालेऽनेन विहितं संवृतत्वमसिद्धं भवति। एवं येषां शास्त्राणां 'अ अ (पा० सू० ८.४.६८)' इत्यनेन साकं समानविषयता, तेषां शास्त्राणां प्रवृत्त्यनन्तरमेव तत्र विहितं संवृतत्वं तिष्ठति, न तु सूत्राणां प्रवृत्तिकाले।



**डॉ. पुष्पा दीक्षिता**

अध्यक्षा, पाणिनीयशोधसंस्थानम्

बिलासपुरम्

१.७.१९४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राणाचार्यपण्डितसुन्दरलालशुक्लाज्जानकीदेव्यां लब्धजनिः महामहोपाध्यायाचार्या डॉ. पुष्पा दीक्षिता, आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य मध्य-प्रदेशशासनस्याथ च छत्तीसगढ़प्रदेशशासनस्य महाविद्यालयीयप्राध्यापकपदान्निवृत्ता।

सा च भगवतः पाणिनेर्महत्तमेन तपसा निर्धारितं पाणिनीयाष्टाध्यायीसूत्रक्रमं साक्षात्कृत्य प्रक्रियायाः सर्वथा नवीनं क्रमं प्रक्रियाविज्ञानं च प्रोद्घाटितवती, येन निखिलाष्टाध्यायी त्रिभिर्मासैरधिगता भवतीति नास्ति संशीतिलेशोऽपि।

**प्रकाशितग्रन्थाः** –

१. अष्टाध्यायीसहजबोधः, अष्टसु भागेषु (तत्र चत्वारो भागाः प्रकाशिताः)
२. नव्यसिद्धान्तकौमुदी, चतुर्दशसु भागेषु (तत्र पञ्च भागाः प्रकाशिताः)
३. तिङन्तकोषः (त्रयो भागाः)
४. कृदन्तकोषः (द्वौ भागौ)
५. तिङ्कृत्कोषः (द्वौ भागौ)
६. लकारसरणिः (चत्वारो भागाः)
७. णिजन्तकोषः
८. सन्नन्तकोषः
९. यङन्तकोषः
१०. यङ्लुगन्तकोषः
११. इडागमः (संस्कृते, राष्ट्रभाषायाञ्च)
१२. पाणिनीयाष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)
१३. प्रकियानुसारिपाणिनीयधातुपाठः
१४. शीघ्रबोधव्याकरणम्
१५. पाणिनीयधातुपाठः (सार्थः)
१६. औपदेशिकः पाणिनीयधातुपाठः (सार्वधातुकप्रत्ययोपयोगी)
१७. औपदेशिकः पाणिनीयधातुपाठः (आर्धधातुकप्रत्ययोपयोगी)
१८. तिङ्कृत्कोषः (द्वौ भागौ)
१९. अग्निशिखा (गीतिकाव्यम्)
२०. शाम्भवी (गीतिकाव्यम्)
२१. अपराजितवधूः (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२२. प्रबुद्धभारतम् (खण्डकाव्यम्) अस्य संपादनमनुवादश्च
२३. सौन्दर्यलहरी, अस्याः संपादनम्

**प्रकाश्यग्रन्थाः** –

२४. नव्यसिद्धान्तकौमुदी (अवशिष्टा नव भागाः)
२५. अष्टाध्यायीसहजबोधः (अवशिष्टाश्चत्वारो भागाः)
२६. परिभाषेन्दुशेखरस्य बहुतरपरिभाषाणामन्यथासिद्धिः

अन्ये च